# विद्यापीठगीतिः

श्रीमज्जयतीर्थार्ययोगिनां दिव्यसन्निधानं ।
विद्यापीठमिदं कल्पवृक्षतुल्यं ।।

सत्प्रमोदगुरुरुचिरभूमिजं
गुरुसत्यात्मसुजलदपोषितम् ।
श्रीमद्गुत्तलवर्यमूलकं
विद्यापीठमिदं कल्पवृक्षतुल्यं ।।

सध्यानवर्यदृढकाण्डभूषितं
विविदाध्यापकशाखायुक्तम् ।
काव्यव्याकरणपत्रशोभितं
विद्यापीठमिदं कल्पवृक्षतुल्यं ।।

वेदवेदान्तसुकुसुमोपेतं
हरिलोकाख्यसुरम्यफलयुतम् ।
विविधदेशद्विजवृन्दसेवितं
विद्यापीठमिदं कल्पवृक्षतुल्यं ।।